पुद्गलास्तिकायमध्ये पदार्थभेदे अर्हत्शब्दे दृश्यम् ।

**धर्मिक** त्रि॰धर्मोऽस्त्यस्य ठन् । धर्मयुक्ते । ततः पुरोहिता॰ तस्य कर्मभावादौ यक् । धार्म्मिक्य तद्भावे न॰ ।

**धर्मिन्** त्रि॰ धर्मोऽस्त्यस्य इनि । १धर्मविशिष्टे स्त्रियां ङीप् । सा च २जायायाम् । "त्रिगुणमचेतनं प्रसवधर्मि" सां॰का॰ । ३आधारे च सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्मकद्रव्यजन्या" सां॰ प्र॰ भा॰ । "नित्यत्वाच्च चित्धर्मा" सा॰ सू॰ भाष्ये पुरुषस्य प्रकाशरूपत्वे सिद्धे तत्सम्बन्धमात्रेणान्यव्यवहारोपपत्तौ प्रकाशात्मकधर्मकल्पना गौरवमित्यपि बोध्यम् । तेजसश्च प्रकाशाख्यरूपविशेषाग्रहेऽपि स्पर्शपुरस्कारेण ग्रहात् प्रकाशतेजसोर्भेदः सिद्ध्यति । आत्मनस्तु ज्ञानाख्यप्रकाशाग्रहकाले ग्रहणं नास्तीत्यतो लाघवात् धर्मधर्मिभावशून्यं प्रकाशरूपमेवात्मद्रव्यं कल्प्यते" "धर्म्यंशे सर्वमभ्रान्तं प्रकारे च विपर्य्ययः" न्यायका॰ । धर्माः श्रौतस्मार्त्ता कर्त्तव्यत्वेन सन्त्यस्य । ४धार्मिके त्रि॰ स्त्रियां ङीप् । धर्मः पाल्यत्वेनास्त्यस्य इनि ५विष्णौ पु॰ । "धर्मगुप् धर्मकृत् धर्मी" विष्णुस॰ ।

**धर्मिष्ठ** त्रि॰ अतिशयेन धर्मवान् इष्ठन् मतुपो लोपः । १अतिशयेन धार्मिके । २विष्णौ पु॰ ।

**धर्मेन्द्र** पु॰ धर्मे इन्द्र इव रक्षकत्वात् । धर्मराजे यमे "पितॄणामिव धर्मेन्द्रो यादसामिव चाम्बुराट्" भा॰द्रो॰ ६अ॰ । धर्मेशधर्मेश्वरादयोऽप्यत्र ।

**धर्मेयु** पु॰ पौरववंश्यस्य रौद्राश्वस्य पुत्रभेदे । "धर्मेयुः सन्नतेयुश्च दशमो देवविक्रमः" भा॰ आ॰ ९४ अ॰ । तत्पुत्रोक्तौ

**धर्मोत्तर** त्रि॰ धर्म उत्तरः प्रधानमस्य । धर्मप्रधाने ।

**धर्मोपदेश** पु॰ धर्म उपदिश्यतेऽनेन उप+दिश–करणे घञ् ६त॰ । १धर्मशास्त्रे मन्वादिशास्त्रे "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" मनुः । भावे घञ् । २धर्मस्य उपदेशे "धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः । तप्तमासेचयेत् तैलं वक्त्रे श्रोत्रे च पार्थिवः" मनुः ।

**धर्मोपदेशक** त्रि॰ धर्ममुपदिशति उप–दिश ण्वुल् ६त॰ । १धर्मस्योपदेशकर्त्तरि २गुरौ पु॰ ।

**धर्म्य** त्रि॰ धर्मादनपेतः "धर्मपथ्यर्थन्यायादनपेते" पा॰ यत् । धर्मेण प्राप्यः "नौवयोधर्मेत्यादिना" पा॰यत् वा । १धर्मयुक्ते धर्मादबहिर्भूते २धर्मेण प्राप्ये च "न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे" मनुः । ब्राह्माद्यष्टविवाहोपक्रमे "यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ । तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् । षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् । विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यान्न राक्षसान् । चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः । राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः । पञ्चानान्तु त्रयोधर्म्या द्वावधर्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन । पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ । गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ" ।

**धर्ष** पु॰ धृष–भावे घञ् । १प्रागल्भ्ये २अमर्षे ३शक्तिबन्धने ४संहतौ ५हिंसायाञ्च शब्दच॰ ।

**धर्षक** त्रि॰ धृष–ण्वुल् । १परिभवकारके २प्रगल्भे ३असहने च ४नटे पु॰ शब्दरत्ना॰ ।

**धर्षकारिन्** त्रि॰ धर्षं करोति कृ–णिनि ६त॰ । १परिभवकर्त्तरि २प्रागल्भ्यकारके च ३दूषितायाम् असत्यां स्त्री स्त्रियां ङीप् शब्दर॰ ।

**धर्षण** न॰ धृष–भावे ल्युट् । १परिभवे २असहने ३धर्षशब्दार्थे च । कर्मणि ल्युट् । ४अभिसारिकायां स्त्रियाम् स्त्री ङीप् । मेदि॰ । कर्त्तरि ल्यु । ५धर्षकारके त्रि॰ । ६शिवे पु॰ । "अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः" भा॰ अनु॰ १७ अ॰ शिवसहस्रनामोक्तौ चु॰ धृष–भावे युच् । ७धर्षणे स्त्री "श्रुत्वेमां धर्षणां तात ! तव तेन दुरात्मना" भा॰ आ॰ ४१ अ॰ ।

**धर्षणि(णी)** स्त्री धृष्यतेऽसौ धृष–कर्मणि अनि । असत्यां बन्धक्याम् उणादिवृत्तिः वा ङीप् तत्रार्थे भरतः ।

**धर्षित** त्रि॰ धृष–कर्मणि क्त इट् गुणश्च । १परिभूते असत्यां २कुलटायां स्त्री शब्दरत्न॰ । भावे क्त । ३असहने ४मैथुने च न॰ त्रिका॰ । ५परिभवे च ।

**धलण्ड** पु॰ दधाति धा–ड तं लण्डयति उत्क्षिपति लडि–उत्क्षेपे अण् । (धला आकड़) वृक्षे शब्दच॰ । ण्वुल् । धलण्डक तत्रार्थे तस्य कण्टकाढ्यत्वेन धारकस्योत्क्षेपणात्तथात्वम् ।

**धव** गतौ भ्वा॰ प॰ सक॰ सेट् इदित् । धन्वति अधन्वीत् । इदित्त्वात् कर्मणि धन्व्यते धन्वधातोस्तु धव्यते इति भेदः ।

**धव** त्रि॰ धवति धुवति धुनोति धूनाति वा कर्त्तरि अच् । १कम्पनकारके २पत्यौ स्वामिनि ३नरे पु॰ अमरः ५धूर्त्ते त्रि॰ मेदि॰ । (धला आकुड़ा) ख्याते वृक्षे पु॰ रत्नमा॰ । "धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहा । मधुरस्तु-